कोश

क्र.नं. १२

काश्मीरी कोशः

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

॥श्रीगणेशायनमः॥ अथऐकाक्षरीकोशःप्रारभ्यते॥ अकारोवासुदेवस्यादाकारस्तुपितामहः॥पूजायामपिमांगल्ये आकारः
परिकीर्तितः॥इकारउच्यतेकामोलक्ष्मीरीकारउच्यते॥१॥उकारःशंकरःप्रोक्तःऊकारश्चापिरक्षणे॥२॥रक्षणेचापिऊ
कारऊकारोब्रह्मणिस्मृतः॥ऋकारोदेवमातास्यात्ॠकारोदनुजप्रसूः॥लृकारोदेवजातीनांमातासद्भिःप्रकीर्तिता
लॄकारःस्मर्यतेपूर्वैः जननीशब्दकोविदैः॥४॥एकारउच्यतेविष्णुरेकारःस्यान्महेश्वरः॥ओकारस्तुभवेद्ब्रह्माओं
कारोनंतउच्यते॥५॥अंस्याच्छ्यपरंब्रह्मअःस्याच्चमहेश्वरः॥कःप्रजापतिरुद्दिष्टोकोकेवायुनलेषुच॥६॥कः
श्चात्मनिमयूरेचकःप्रकाशउदाहृतः॥ कंशिरोजलमाख्यातंकंसुखंचप्रकीर्तितं॥७॥पृथिव्यांकुःसमाख्यातः
कुःशब्देपिप्रकीर्तितः॥खमिंद्रियेखमाकाशेखःस्वर्गेपिप्रकीर्तितः॥८॥सामान्येचतथाशून्येखःशब्दःपरिकीर्तितः॥गो
गणेशःसमुद्दिष्टोगंधर्वोगःप्रकीर्तितः॥९॥गंगीतंगाचगाथास्याद्गौश्चधेनुःसरस्वती॥घाघंटाघ्रुसमाख्याताघो
घनश्चप्रकीर्तितः॥१०॥घंटीशाहननेघर्मेघुर्घोणाघूर्घनावपि॥ङकारोभैरवःख्यातोङकारोविषयस्पृहा॥११॥

(2)

एकाक्षरिकोश चश्चंद्रमाः समाख्यातो भास्करे तस्करे मतः ॥ निर्मले छं समाख्यातं तरले छः प्रकीर्तितः ॥ १२ ॥ छेदके छः समाख्यातो विद्वद्भिः
१ शब्दकोविदैः ॥ जकारो गायने प्रोक्तो जयने जः प्रकीर्तितः ॥ १३ ॥ जेता जश्च प्रकथितः सूरिभिः शब्दशासने ॥ रवो झकारः क
थितो नष्टे झश्चोच्यते बुधैः ॥ झकारश्च तथा वायौ नेपथ्ये समुदाहृतः ॥ ञकारो गायने प्रोक्तो ञकारो झईरध्वनौ ॥ १५ ॥
टो धरित्र्यां च करके टो ध्वनौ च प्रकीर्तितः ॥ ठकारो जननायां स्यात् ठो ध्वनौ च शठेऽपि च ॥ १६ ॥ ठो महेशः समाख्यातो ठश्च शू
न्ये प्रकीर्तितः ॥ बृहद्ध्वनौ च ठः प्रोक्तः स्तथा चंद्रस्य मंडले ॥ १७ ॥ डकारः शंकरे त्रासे ध्वनौ भीमे निरुच्यते ॥ ढकारः कीर्तिता
ढक्का निर्गुणे निर्धने मतः ॥ १८ ॥ णकारः सुकरे ज्ञाने निश्चये निर्णयेऽपि च ॥ तकारः कीर्तितश्चौरे क्रोडपुच्छे प्रकीर्तितः ॥ १९ ॥
शिलोच्चये थकारः स्यात् थकारो नयरक्षणे ॥ दकारो भ्रे कलत्रे च छेदे दाने च दातरि ॥ २० ॥ धं धने स धने धः स्यात् द्विधात
रि मनावपि ॥ धिषधा धीः समाख्याता धूश्चैवं भारचिंतयोः ॥ नेता नश्च समातस्तरणौ नः प्रकीर्तितः ॥ २१ ॥ नकारः
रौगतेषु ध्वौ रक्ते नौ च क्षेत्रे प्रकीर्तितः ॥ २२ ॥ नः शब्दः स्वागते बंधौ वृक्षे सूर्ये च कीर्तितः ॥ पः कुबेरः समाख्यातः पश्चिमे च प्र ३

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2A)

कीर्तितः ॥ २३ ॥ प पवने पः समाख्यातः पस्यास्याने च पातरि ॥ कफवाते फकारः स्यात्तथा ह्वाने प्रकीर्तितः ॥ २४ ॥ फूत्कारेपि च
फः प्रोक्तस्तथा निष्फलभाषणे ॥ बकारो वरुणः प्रोक्तः कलशो बः फलेपि च ॥ २५ ॥ वक्षःस्थलेच बः प्रोक्तो गोदायां समुदाहृतः
॥ नक्षत्रे भं बुधाः प्राहुर्भवने भः प्रकीर्तितः ॥ २६ ॥ दीप्तिर्भा स्याच्च भः भूमिर्भी भयं कथितं बुधैः ॥ मः शिवश्चंद्रमा वेधा मो लक्ष्मी
च प्रकीर्तिता ॥ २७ ॥ मा च मातरि माने च बंधने मः प्रकीर्तितः ॥ यशोयः कथितः प्राज्ञैर्यो वायुरिति शब्दितः ॥ २८ ॥ याने यातरि
यस्त्यागे कथितः शब्दवेदिभिः ॥ रश्च रामे नि लेयन्हो भूमावपि धनेपि च ॥ २९ ॥ इंद्रिये धनरो धैर्ये रुभयेच प्रकीर्तितः ॥ लो दीप्तो
यां लश्च भूमौ भये चाल्हादनेपि ॥ ३० ॥ लो वाते लवणे च स्याल्लो दाने च प्रकीर्तितः ॥ लश्लेषे चाश्रये चैव प्रलये सा धनेपि लः ॥ ३१ ॥
मानसे च रुणे चैव लकारः सांत्वनेपि च ॥ विश्च पक्षीति निगदितो गगनं प्रति कीर्तितं ॥ ३२ ॥ शंकरवंशः शंकरः श्रेयः शश्च सीम्नीति निगद्य
ते ॥ शायने शः समाख्यातो हिंसायां शोनि गद्यते ॥ ३३ ॥ षः कीर्तितो बुधैः श्रेष्ठ षश्च गंभीरलोचने ॥ उपसर्गे परोक्षे च षकारः
परिकीर्तितः ॥ सः कोपे च रणे सस्यात्तथा शूलिनि कीर्तितः ॥ सा च लक्ष्मीर्बुधैः प्रोक्ता गौरी सा च स ईश्वरः ॥ ३५ ॥ हः कोपे वारणे हः

Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3)

एकाक्षरीकोश

२

श्यतथाभृल्लिप्रकीर्तितः ।। ह्निः पश्चावरणे प्रोक्तोह्निस्या ध्येस्तन धारणे ।।३६।। क्षः क्षेत्रे वक्षसि प्रोक्तो बुधैः क्षः शाब्द शासने ।। क्षिः
क्षेत्रे क्षत्तर क्षेत्र न्टसिंहेच प्रकीर्तितः ।। ३७ ।। आगमेभ्योभि धानेभ्यो धातुभ्यः शब्दशासनात् ।। एवमेकाक्षरंनामाभिधा
नंक्रियतेमया ।। ३८ ।। इति एकाक्षरीकोशः समाप्तः ।। अथ हारावलीकोशः प्रारभ्यते ।। भुजगपतिविमुक्तः स्वच्छनिर्मोकव
हृद्वि विलसितमनुकुर्वन् यस्य गंगाप्रवाहः ।। शिरसि सरसभास्वन् मालतीदाम लक्ष्मीं लघयतिहिमगोरः सोस्तुवः साध्यसि
ध्ये ।।१।। कलुषावसान समयेस्थितये कवीनां देहांतरंकिमपिया सृजति प्रसन्ना ।। यस्याः प्रसादपरमाणुरपिप्रतिष्ठा मभ्ये
तिकामपिनमामिस रस्वतींतां ।।२।। निर्मलसराः स्फुरितनः खलुयविविच्य कर्णे गुणस्य कणमप्ययतं सयंति ।। येषांमनोनर
मते परदोषवादे नेकेचिदेवविरला भुविसंचरंति ।।३।। मुक्तामयातिमधुरामसृणावदातच्छायाधिरागतरला मलसद्गुणश्रीः
।। साध्वीसतां भजतुकंठमसौप्रियेव हारावलीविरचितापुरुषोत्तमेन ।।४।। किंनैवसंतिसुधियामभिधान कोशाः किंतुप्रतिसि
ध्यविषयव्यतिचारभाजः ।। गोष्ठीषु दापरमोहकलास्केषां हारीबलीनविदधातिविदग्धमाने ।।५।। एकंतमेवगणयंतिपरंवि २

वेहा

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com